दिनाङ्क :-30.10.2025

प्रात: - 06:55

PM-Maritime सप्ताहः

प्रधानमन्त्री नरेन्द्रमोदी ह्य: अवदत् यत्, समुद्रीयक्षेत्रं भारतस्य विकासस्य चालकः अस्ति। सः अवदत् यत्, गतदशके अस्मिन् क्षेत्रे महत्त्वपूर्णपरिवर्तनं जातम्, येन व्यापारस्य, नौकाश्रयस्य मूलसौकर्याणां च वृद्धिः अभवत्। श्रीमोदी ह्य: सायङ्काले मुम्बई-नगरस्य नेस्को इति प्रदर्शनी-केन्द्रे पञ्चविंशत्यधिक द्विसहस्रतम वर्षस्य इण्डिया-मारिटैम्-वीक् इत्यस्य अन्तर्गतं आयोजिते मारिटैम्-लीडर्-कान्क्लेव् इत्येतं सम्बोधयन् आसीत्। सः अवदत् यत्, भारतस्य समुद्रीयक्षेत्रं महता वेगेन ऊर्जया च प्रगतिं कुर्वद् अस्ति। प्रधानमन्त्री अवदत् यत्, अद्य भारतस्य नौकाश्रयाः विकासशीलराष्ट्रेषु सर्वाधिक-दक्षतया गण्यन्ते। सः अवदत् यत्, अनेकेषु विषयेषु ते विकसितविश्वस्य अपेक्षया अपि उत्तमं प्रदर्शनं कुर्वन्तः सन्ति।

प्रधानमन्त्री द्विदिवसीय-यात्रायाः

प्रधानमन्त्री नरेन्द्रमोदी अद्यारभ्य गुजरातराज्यस्य द्विदिवसीय-यात्रायाः आरम्भः करिष्यति। सः ह्य: केवडिया-नगरस्य एकता-नगरे चत्वारिंशदधिकैकशत कोटिरूप्यकाणां आधारभूतसंरचनानां विकास-परियोजनानां च उद्घाटनं च शिलान्यासं च करिष्यति। उद्घाटितप्रकल्पेषु राजपीपला-नगरस्य बिर्सा-मुण्डा-जनजातीय-विश्वविद्यालयः, वामन-वृक्ष-वाटिका, ई-बस्-चार्जिङ्ग्-डिपो, पञ्चविंशति विद्युत्-बस्-यानानि च अन्तर्भवन्ति। अपि च, श्रीमोदी भारतस्य रायल् किङ्गडम्स् इत्यस्य सङ्ग्रहालयः, क्रीडा-परिसरः, शूलपानेश्वरघाटस्य समीपे जेट्टी-विकासः, स्टैचू आफ् यूनिटी इत्यत्र विविध-परियोजनानां शिलान्यासं करिष्यति। प्रधानमन्त्री श्वः राष्ट्रीय एकता दिवसस्य उत्सवे भागं ग्रहीष्यति सहैव सरदार वल्लभभाई

पटेलवर्यस्य जन्मदिवसस्य अवसरे पुष्पांजलिः समर्पयिष्यति। उत्सवस्य समये सः एकता दिवसस्य शपथग्रहण समारोहे, एकता दिवसस्य पथसञ्चलने अपि भागं ग्रहीष्यति।

## बिहार-राज्ये विधानसभा-निर्वाचनस्य प्रचारः

बिहार-राज्ये विधानसभा-निर्वाचनस्य प्रचारः इतोऽपि तीव्रः अभवत्। विभिन्नानां राजनैतिकदलानां नेतारः शीर्ष-प्रचारकाः च सम्पूर्णे राज्ये जनसभायाः आयोजनं कृतवन्तः। एन्. डी. ए. तथा महाघटबन्धन् इत्येतयोः दलयोः प्रमुखाः नेतारः शीर्ष-प्रचारकाः च प्रचारं तीव्रं कृतवन्तः। प्रधानमन्त्री तथा भाजपेति-दलस्य वरिष्ठः नेता नरेन्द्रमोदी अद्य बिहारस्य मुज़फ़्फ़रपुर-नगरे, छपरा-नगरे च निर्वाचन-सभे सम्बोधयिष्यति। एकस्मिन् सामाजिकान्तर्जालीय सन्देशे श्रीमोदी अवदत् यत् सः प्रातः एकादशवादने मुज़फ़्फ़रपुरे, अपराह्णे पादोनैक-वादने छपरा-नगरे च सभां करिष्यति। केन्द्रीय-गृह-मन्त्री अमितशाहः अपि अद्य पटना-नगरे एकं वार्ताहर-सम्मेलनं करिष्यति। अत्रान्तरे काङ्ग्रेस्-दलस्य वरिष्ठः नेता राहुलगान्धी अपि ह्यः मुज़फ़्फ़रपुरतः स्वस्य निर्वाचन-प्रचारम् आरब्धवान्। महाघटबन्धनस्य मुख्यमन्त्रीपदस्य प्रत्याशि तथा आर्. जे. डी. इति दलस्य नेता तेजस्वी प्रसाद यादवः मधेपु रायाः सिङ्गेश्वरे एकां जनसभां सम्बोधितवान्।

## सरदार पटेल्-स्मृति-व्याख्यानम्

केन्द्रीयमन्त्रिणः डा. मनसुख माण्डवीयः अवदत् यत्, सरदार-वल्लभ-भाई-पटेल-वर्यः अस्य राष्ट्रस्य रिक्थः, विचारः, संस्था च अस्तीति। सः देशस्य नागरिकान्, विशेषतः यूनः, विकसितभारतस्य निर्माणाय तस्य जीवनात् प्रेरयितुं प्रार्थितवान्। ह्यः नवदिल्ल्याः आकाशवाणीभवने पञ्चविंशत्यधिक द्विसहस्रतम वर्षस्य सरदार पटेल्-स्मृति-व्याख्यानम् सम्बोधयन् आसीत् । डा. माण्डवीयः अवदत् यत् जम्मू-कश्मीरे सप्तत्यधिक त्रिशतानुच्छेदः अपसार्य प्रधानमन्त्रिणा नरेन्द्रमोदिना सरदार पटेलस्य अपूर्णकार्यं पूर्णं कृतम्। भारतस्य प्रथमस्य सूचना-प्रसारण-मन्त्रिणः सरदार वल्लभभाई पटेलस्य सम्माने आकाशवाणी वार्षिकं सरदार पटेल-स्मृति-व्याख्यानम् आयोजयति। अस्य व्याख्यानस्य ध्वनिमुद्रणं श्वः सरदार पटेलस्य जन्मदिवसस्य अवसरे आकाशवाण्या सायं सार्ध नववादने वादने प्रसारितं भविष्यति।

<u>क्रिकेट</u>

आई.सी.सी.महिलानाम् एकदिवसीय-क्रिकेट-विश्व-चषक-स्पर्धायां नवी-मुम्बई नगरे द्वितीये उपान्त्यचक्रीय-द्वन्द्वे भारतीय महिला-दलं ऑस्ट्रेलिया-दलं सम्मुखीकरिष्यति। क्रीडाया: आरम्भ: अपराह्ने त्रिवादने भविष्यति।